CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥ हरिः ॐ सहनाववतु। सहनौभुनक्तु
सहवीर्यंकरवावहै। तेजस्विनावधीतमस्तुमाविद्विषा
वहै ॐ शान्तिः शान्तिः शान्तिः ॐ ब्रह्मविदाप्नोतिपरम्। तदे
षाभ्युक्ता सत्यं ज्ञानमनन्तंब्रह्म योवेदनिहितंगुहया
परमेव्योमन्सोश्नुतेसर्वान्कामान्सह ब्रह्मणाविपश्चि
तेति तस्माद्वैतस्मादात्मन आकाशः संभूतः आका
शाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथि
व्याओषधयः ओषधीभ्योन्नम्। अन्नात्पुरुषः सवा
एषपुरुषोन्नरसमयः तस्येदमेवशिरः अयंदक्षिणः
पक्षः अयमुत्तरः पक्षः अयमात्मा इदंपुच्छंप्रतिष्ठा
तदप्येषःश्लोकोभवति। अन्नाद्वैप्रजाःप्रजायन्ते याः

Kashi Maharani Collection, Ramnagar Fort, Varanasi.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कामश्रयंतीः पृथिवीश्रिताः॥ अथो अन्नेनैव जीवंति॥ अथैन
दपियंत्यंतकतः॥ अन्नं हि भूतानां ज्येष्ठं॥ तस्मात्सर्वौषध
मुच्यते॥ सर्वं वैतेन्नमाप्नुवंति॥ येन्नं ब्रह्मोपासते॥ अन्न
ं हि भूतानां ज्येष्ठं॥ तस्मात्सर्वौषधमुच्यते॥ अन्नाद्धि भूता
नि जायंते॥ जातान्यन्नेन वर्द्धंते॥ अद्यतेत्ति च भूतानि॥ तस्मा
दन्नंतदुच्यतइति॥ तस्माद्वा एतस्माद्वान्नरसमयात्॥
अन्योंतरआत्मा प्राणमयः॥ तेनैषपूर्णः॥ सवाएषपुरुषविध
एवा॥ तस्यपुरुषविधतां॥ अन्वयंपुरुषविधः॥ तस्यप्राणए
वशिरः॥ व्यानोदक्षिणःपक्षः॥ अपानउत्तरःपक्षः॥ आका
शआत्मा॥ पृथिवीपुच्छंप्रतिष्ठा॥ तदप्येषःश्लोकोभवति॥ १॥
प्राणंदेवाअनुप्राणंति॥ मनुष्याःपशवश्चये॥ प्राणोहिभूता
नामायुः॥ तस्मात्सर्वायुषमुच्यते॥ सर्वमेवतआयुर्यंति॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यः प्राणंप्रत्यो पास्ते। प्राणोहि भूतानामायुः। तस्मा त्स र्वायु
षम्यत इति। तस्येष एव शारीर आत्मा॥ यः पूर्वस्या तस्मा द्वा ए
तस्मात्प्राणमयात्। अन्योन्तर आत्मा मनोमयः। तेनैष पूर्णः। स
वा एष पुरुष विध एव। तस्य पुरुष विधता। अन्वयं पुरुष
विधः॥ तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। साम्नोत्तरः
पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा॥ तदप्ये
षश्लोको भवति॥३॥ यतो वाचो निवर्तन्ते॥ तस्येष एव शा
रीर आत्मा॥ × अप्राप्य मनसा सह॥ आनन्दं ब्रह्मणो विद्वान्।
न बिभेति कुतश्चनेति॥ × यः पूर्वस्या तस्मा द्वा ए तस्मान्म
नोमयात्॥ अन्योन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः।
स वा एष पुरुष विध एव। तस्य पुरुष विधता। अन्वयं पुरु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षविध्यः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमु
त्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लो
कोभवति॥ ७॥ विज्ञानं यज्ञं तनुते। कर्माणि तनुते
पि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञा
नं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो
हित्वा। सर्वान्कामान्समश्नुत इति। तस्येष एव शा
रीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्।
अन्योन्तर आत्मानंदमयः। तेनैषपूर्णः। सवा एष
पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरु
षविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रमोऽनुत्तरः पक्षः। आनंदआत्मा। ब्रह्मपुच्छं प्रतिष्ठा
नदृष्टश्लोकौ भवतः॥५॥ असन्नेवस भवति। असद्
ब्रह्मेतिवेदचेत्। अस्तिब्रह्मेतिचेद्वेद। सन्तमेनंततो
विदुरिति। तस्यैषैवशारीर आत्मा। यः पूर्वस्य॥ आ
थानोनुपाभ्राः॥ उताविद्वानमुंलोकंप्रेत्य। कआनगच्छ
ती॥ आहोविद्वानमुंलोकंप्रेत्य। कश्चित्समश्नुतेऽउसो
कामयत। बहुस्यांप्रजायेयेति। सतपोतप्यत॥ सतपस्त
प्त्वा॥ इदंसर्वमसृजत। यदिदंकिंचातत्सृष्ट्वा॥ तदेवानु
प्राविशत्॥ तदनुप्रविश्यासच्चसच्चाभवत्॥ निरुक्तं
चानिरुक्तंचा। निलयनंचानिलयनंच॥ विज्ञानंचा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२ विज्ञानंचसत्यंचानृतंचसत्यमभवत्सदित्येवकिंचतत्स
त्यमित्याचक्षतेतदप्येषश्लोकोभवति॥६॥असदेवेदमग्र
आसीत्ततोवैसदजायतततआत्मानंस्वयमकुरुत
॥तस्मात्तत्सुकृतमुच्यतइतियदैतत्सुकृतंरसोवैसः
रसंह्येवायंलब्ध्वानंदीभवतिकोह्येवान्यात्कःप्राण्यात्॥
एषह्येवाकाशआनंदोनस्यात्॥एषह्येवानंदयातिएष
ह्येवैषएतस्मिन्नदृश्येनात्म्यनिरुक्तेनिलयनेभयंप्रति
ष्ठांविंदते॥अथसोभयंगतोभवतियदाह्येवैषएतस्मि
न्नुदरमंतरंकुरुतेअथतस्यभयंभवति॥तत्वेवभयंवि
दुषोमन्वानस्यादृषःश्लोकोभवति॥७॥भीषास्मा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

घ्नतः पथते ॥ भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च ॥ ८ ॥
मृत्युर्धावति पञ्चम इति सैषानन्दस्य मीमांसा भवति
युवा स्यात्साधुयुवाध्यायकः आशिष्ठो दृढिष्ठो बलि
ष्ठः तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ॥ स एको
मानुष आनंदः ॥ ते ये शतं मानुषा आनंदाः स एको
मनुष्यगंधर्वाणामानंदः श्रोत्रियस्य चाकामहतस्य ॥
ते ये शतं मनुष्यगंधर्वाणामानंदाः स एको देवगंध
र्वाणामानंदः ॥ श्रोत्रियस्य चाकामहतस्य ॥ ते ये श
तं देवगंधर्वाणामानंदाः ॥ स एकः पितॄणां चिर
लोकलोकानामानंदः ॥ श्रोत्रियस्य चाकामहतस्य ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तेषेरा तंपित्रणांचिरलोकलोकानामानंदाः॥स
एकआजानजानांदेवानामानंदः।श्रोत्रियस्य
चाकामहतस्य॥तेषेरान्प्राजानेजानांदेवानां
मानंदाः॥सएकःकर्मदेवानामानंदः।येकर्मणा
देवानपियंति॥श्रोत्रियस्यचाकामहतस्य॥तेषे
रातंकर्मदेवानामानंदाः॥सएकोदेवानामानंदः।
श्रोत्रियस्यचाकामहतस्य॥तेषेरातंदेवानामा
नंदाः।सएकइंद्रस्यानंदः।श्रोत्रियस्यचाकामह
तस्य।तेषेरातप्रिस्यानंदाः॥सएकोबृहस्पते
रानंदः।श्रोत्रियस्यचाकामहतस्य॥तेषेरातंब्र

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हस्तेरानंदः॥सएकः प्रजापतेरानंदः॥श्रोत्रियस्यचा
कामहतस्य॥प्रजापतेरानंदः॥सएको
ब्रह्मणआनंदः।श्रोत्रियस्यचाकामहतस्य॥सयश्चा
यंपुरुषेयश्चासावादित्येसएकः॥सयएवंवित्॥
अस्माल्लोकात्प्रेत्य॥एतमन्नमयमात्मानमुपसंक्रा
मति॥एतंप्राणमयमात्मानमुपसंक्रामति॥एतंमनो
मयमात्मानमुपसंक्रामति॥एतंविज्ञानमयमात्मा
नमुपसंक्रामति॥एतमानंदमयमात्मानमुपसं
क्रामति॥तदेषःश्लोकोभवति॥८॥यतोवाचो
निवर्तंते॥अप्राप्यमनसासह॥आनंदंब्रह्मणो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

विद्वान्॥ नविमेनिकुलस्थनेनि॥ एतद्ब्रह्मावनन
पति॥ विप्रहण्साधुनाकरवम्॥ केप्रहपापमकर
वमिति॥ सयत्वंविद्वानेतेआत्मानण्स्पणुते॥
उमेह्येवैषएतेआत्मानण्स्पणुते॥ यएवंवेद॥ इत्यु
पनिषत्॥९॥ सहनाववतु॥ सहनौभुनक्तु॥ सह
वीर्यंकरवावहै॥ तेजस्विनावधितमस्तुमाविद्विषावहै॥ ॐशांतिःशांतिःशांतिः॥ ६॥ ६॥
॥८७॥ ८७॥ इतिब्रह्मविद्यासमाप्तः॥ श्रीसां
बापर्णमस्तु॥ ८७॥ ८७॥ ८७॥ ८७॥ ८७॥ ८७॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi